# Mohini Kavacham

# मोहिनीकवचम्

## Document Information

Text title : mohinIkavacham or mahAlasA kavacham

File name : mohinIkavacham.itx

Category : kavacha, devii, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Source : bhaviShyottarapurANa

Latest update : February 10, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# मोहिनीकवचम्

श्रीगणेशाय नमः ॥

भगवन् सर्वधर्मज्ञ सर्वागमविशारद ।
कवचं देवतायास्तु कृपया कथय प्रभो ॥ १॥

ब्रह्मोवाच ।
शृणु देव महाप्राज्ञ सर्वशास्त्रविशारद ।
कवचं मोहिनीदेव्या महासिद्धिकरं परम् ॥ २॥

मोहिनी मे शिरः पातु भालं नेत्रयुगं तथा ।
भ्रुवौ च कामिनी रक्षेन्मुखं वागीश्वरी तथा ॥ ३॥

श्रोत्रे मङ्गलरूपा च कण्ठं महिषमर्दिनी ।
भुजौ सौदर्यनिलया हस्तौ रक्षेद्यशस्विनी ॥ ४॥

सर्वदा नाभिदेशे तु कमला पातु चोदरम् ।
विजया हृदयं पातु कटिं सुरवरार्चिता ॥ ५॥

करौ महालया रक्षेदङ्गुलीर्भक्तवत्सला ।
वैष्णवी पातु जङ्घे च माया मेढ्रं गुदं तथा ॥ ६॥

पादौ च देवजननी तलं पातालवासिनी ।
पूर्वे तु मोहिनी रक्षेद्दक्षिणे सुखदायिनी ॥ ७॥

पश्चिमे वारुणी रक्षेदुत्तरेऽमृतवासिनी ।
ईशान्यां पातु चेशानी आग्नेय्यामग्निदेवता ॥ ८॥

नैर्ऋत्यां खड्गधृग्देवी वायव्यां मृगवाहिनी ।
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥ ९॥

अग्रतः पातु चेन्द्राणी वाराही पृष्ठतस्तथा ।
कौबेरी चोत्तरे पातु दीक्षणे विष्णुवल्लभा ॥ १०॥

इदं कवचमज्ञात्वा यो भजेन्मोहिनीं नरः ।
वृथा श्रमो भवेत्तस्य न मन्त्रः सिद्धिदायकः ॥ ११॥

भूर्जपत्रे समालिख्य कुङ्कुमादिकचन्दनैः ।
शतमष्टोत्तरं जाप्यं स्वर्गस्थं धार्यते यदि ॥ १२॥

कण्ठे वा दीक्षणे बाहावष्टसिद्धिर्भवेद्ध्रुवम् ।
सर्वथा सर्वदा नित्यं मोहिनीकवचं जपेत् ॥ १३॥

राजद्वारे सभास्थाने कारागृहनिबन्धने ।
जलमध्ये भूमिमध्ये तथा निर्जनके वने ॥ १४॥

अरण्ये प्रान्तरे घोरे शत्रुसङ्घे महाहवे ।
शस्त्रघाते विषे पीते जपन् सिद्धिमवाप्नुयात् ॥ १५॥

ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ।
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ १६॥

मनसा चिन्तितं कार्यं सहस्रं जपतस्तथा ।
पलाशमूले प्रजपेत्सहस्रत्रितयं मुदा ॥ १७॥

शत्रुहानिर्ध्रुवं चात्र जायते नात्र संशयः ।
अर्कमूले जपेन्नित्यं मन्त्रराजमिमं शुभम् ॥ १८॥

भोजयेद्ब्राह्मणांश्चैव लक्ष्मीर्वसति सर्वदा ।
यदिदं कवचं नित्यं भक्त्या तव मयोदितम् ॥ १९॥

यो जपेत्सर्वदा भक्त्या मोहिन्याः कवचं शुभम् ।
वाञ्छितं फलमाप्नोति नात्र कार्या विचारणा ॥ २०॥

इति श्रीभविष्योत्तरपुराणे ब्रह्मप्रोक्तं मोहिनीकवचं स्तोत्रं सम्पूर्णम् ॥

महालसा कवचम्

Proofread by PSA Easwaran

*Mohini Kavacham*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*